# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय ८४

वर्तमाने तथाभूते यज्ञे परमकेऽद्भुते ।
सशिष्य आजगामाशु वाल्मीकिर्मुनिपुङ्गवः ॥ १॥

स दृष्ट्वा दिव्यसङ्काशं यज्ञमद्भुतदर्शनम् ।
एकान्ते ऋषिवाटानां चकार उटजाञ्शुभान् ॥ २॥

स शिष्यावब्रवीद्धृष्टो युवां गत्वा समाहितौ ।
कृत्स्नं रामायणं काव्यं गायतां परया मुदा ॥ ३॥

ऋषिवाटेषु पुण्येषु ब्राह्मणावसथेषु च ।
रथ्यासु राजमार्गेषु पार्थिवानां गृहेषु च ॥ ४॥

रामस्य भवनद्वारि यत्र कर्म च वर्तते ।
ऋत्विजामग्रतश्चैव तत्र गेयं विशेषतः ॥ ५॥

इमानि च फलान्यत्र स्वादूनि विविधानि च ।
जातानि पर्वताग्रेषु आस्वाद्यास्वाद्य गीयताम् ॥ ६॥

न यास्यथः श्रमं वत्सौ भक्षयित्वा फलानि वै ।
मूलानि च सुमृष्टानि नगरात्परिहास्यथ ॥ ७॥

यदि शब्दापयेद्रामः श्रवणाय महीपतिः ।
ऋषीणामुपविष्टानां ततो गेयं प्रवर्तताम् ॥ ८॥

दिवसे विंशतिः सर्गा गेया वै परया मुदा ।
प्रमाणैर्बहुभिस्तत्र यथोद्दिष्टं मया पुरा ॥ ९॥

लोभश्चापि न कर्तव्यः स्वल्पोऽपि धनकाङ्क्षया ।
किं धनेनाश्रमस्थानां फलमूलोपभोगिनाम् ॥ १०॥

यदि पृच्छेत्स काकुत्स्थो युवां कस्येति दारकौ ।
वाल्मीकेरथ शिष्यौ हि ब्रूतामेवं नराधिपम् ॥ ११॥

इमास्तन्त्रीः सुमधुराः स्थानं वा पूर्वदर्शितम् ।
मूर्छयित्वा सुमधुरं गायेतां विगतज्वरौ ॥ १२॥

आदिप्रभृति गेयं स्यान्न चावज्ञाय पार्थिवम् ।
पिता हि सर्वभूतानां राजा भवति धर्मतः ॥ १३॥

तद्युवां हृष्टमनसौ श्वः प्रभाते समाधिना ।
गायेतां मधुरं गेयं तन्त्रीलयसमन्वितम् ॥ १४॥

इति सन्दिश्य बहुशो मुनिः प्राचेतसस्तदा ।
वाल्मीकिः परमोदारस्तूष्णीमासीन्महायशाः ॥ १५॥

तामद्भुतां तौ हृदये कुमारौ
निवेश्य वाणीमृषिभाषितां शुभाम् ।
समुत्सुकौ तौ सुखमूषतुर्निशां
यथाश्विनौ भार्गवनीतिसंस्कृतौ ॥ १६॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com